# Mahavakya Upanishad

# મહાવાક્યોપનિષત્

## Document Information

Text title : Mahavakya Upanishad

File name : mahavakya.itx

Category : upanishhat, svara

Location : doc_upanishhat

Author : Vedic tradition

Transliterated by : Sunder Hattangadi

Proofread by : Sunder Hattangadi

Description-comments : 92 / 108;Athrva Veda - Yoga upanishad

Latest update : Apr 13, 2000

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

April 1, 2025

*sanskritdocuments.org*

# મહાવાક્યોપનિષત્

યન્મહાવાક્યસિદ્ધાન્તમહાવિદ્યાકલેવરમ્ ।
વિકલેવરકૈવલ્યં રામચન્દ્રપદં ભજે ॥

ॐ ભદ્રં કર્ણેભિઃ શ્રુણુયામ દેવાઃ
ભદ્રં પશ્યેમાક્ષભિર્યજત્રાઃ ।
સ્થિરૈરઙ્ગૈસ્તુષ્ટુવાँ સસ્તનૂભિઃ
વ્યશેમ દેવહિતં યદાયુઃ ॥

ॐ શાન્તિઃ શાન્તિઃ શાન્તિઃ ॥

હરિઃ ॐ ॥

અથ હોવાચ ભગવાન્બ્રહ્માપરોક્ષાનુભવપરોપનિષદં
વ્યાખ્યાસ્યામઃ । ગુહ્યાદ્ગુહ્યપરમેષા ન પ્રાકૃતાયોપદેષ્ટવ્યા ।
સાત્વિકાયાન્તર્મુખાય પરિશુશ્રૂષવે । અથ
સંસૃતિબન્ધમોક્ષયોર્વિદ્યાવિદ્યે ચક્ષુષી ઉપસંહૃત્ય
વિજ્ઞાયાવિદ્યાલોકાણ્ડસ્તમોદૃક્ । તમો હિ
શારીરપ્રપઞ્ચમાબ્રહ્મસ્થાવરાન્તમનન્તાખિલાજાણ્ડભૂતમ્ ।
નિખિલનિગમોદિતસકામકર્મવ્યવહારો લોકઃ ।
નૈષોઽન્ધકારોઽયમાત્મા ।વિદ્યા હિ કાણ્ડાન્તરાદિત્યો
જ્યોતિર્મણ્ડલં ગ્રાહ્યં નાપરમ્ । અસાવાદિત્યો બ્રહ્મેત્યજપયોપહિતં
હંસઃ સોઽહમ્ । પ્રાણાપાનાભ્યાં પ્રતિલોમાનુલોમાભ્યાં
સમુપલભ્યૈવં સા ચિરં લબ્ધ્વા ત્રિવૃદાત્મનિ
બ્રહ્મણ્યભિધ્યાયમાને સચ્ચિદાનન્દઃ પરમાત્માવિર્ભવતિ ।
સહસ્રભાનુમચ્છુરિતાપૂરિતત્વાદલિપ્યા પારાવારપૂર ઇવ ।
નૈષા સમાધિઃ । નૈષા યોગસિદ્ધિઃ । નૈષા મનોલયઃ ।
બ્રહ્મૈક્યં તત્ । આદિત્યવર્ણં તમસસ્તુ પારે ।
સર્વાણિ રૂપાણિ વિચિત્ય ધીરઃ । નામાનિ કૃત્વાઽભિવદન્યદાસ્તે ।

ધાતા પુરસ્તાદ્યમુદાજહાર । શક્રઃ પ્રવિદ્વાન્પ્રદિશશ્ચતસ્રઃ ।
તમેવ વિદ્વાનમૃત ઇહ ભવતિ । નાન્યઃ પન્થા અયનાય વિદ્યતે ।
યજ્ઞેન યજ્ઞમયજન્ત દેવાઃ । તાનિ ધર્માણિ પ્રથમાન્યાસન્ ।
તે હ નાકં મહિમાનઃ સચન્તે । યત્ર પૂર્વે સાધ્યાઃ સન્તિ દેવાઃ ।
સોઽહમર્કઃ પરં જ્યોતિરર્કજ્યોતિરહં શિવઃ ।
આત્મજ્યોતિરહં શુક્રઃ સર્વજ્યોતિરસાવદોમ્ ।
ય એતદથર્વશિરોઽધીતે । પ્રાતરધીયાનો રાત્રિકૃતં
પાપં નાશયતિ । સાયમધીયાનો દિવસકૃતં પાપં નાશયતિ ।
તત્સાયં પ્રાતઃ પ્રયુઞ્જાનઃ પાપોઽપાપો ભવતિ ।
મધ્યન્દિનમાદિત્યાભિમુખોઽધીયાનઃ
પઞ્ચમહાપાતકોપપાતકાત્પ્રમુચ્યતે ।
સર્વવેદપારાયણપુણ્યં લભતે ।
શ્રીમહાવિષ્ણુસાયુજ્યમવાપ્નોતીત્યુપનિષત્ ॥

ૐ ભદ્રં કર્ણેભિઃ શ્રુણુયામ દેવાઃ
ભદ્રં પશ્યેમાક્ષભિર્યજત્રાઃ ।
સ્થિરૈરઙ્ગૈસ્તુષ્ટુવાꣳ સસ્તનૂભિઃ
વ્યશેમ દેવહિતં યદાયુઃ ॥

ૐ શાન્તિઃ શાન્તિઃ શાન્તિઃ । હરિઃ ૐ તત્સત્
ઇતિ મહાવાક્યોપનિષત્સમાપ્તા ॥

Encoded by Sunder Hattangadi

*Mahavakya Upanishad*

pdf was typeset on April 1, 2025

Please send corrections to *sanskrit@cheerful.com*